दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः
■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-223
1 06.06.2024 गुरुवासरः वि.सं. २०८० ज्येष्ठकृष्णामावस्या ज्येष्ठ 23 प्रविष्टांशः
Website- www.himsanskritam.com Email-himsanskrit@gmail.com

# लोकसभानिर्वाचने भाजपा-नेतृत्वेन एनडीए- सर्वकारेण प्राप्तं बहुमतम्

## 08 जूनदिनाङ्के शपथग्रहणं भवितुं शक्नोति



**नई दिल्ली।** लोकसभानिर्वाचने भाजपा-नेतृत्वेन एनडीए- सर्वकारेण स्पष्टबहुमतं प्राप्तम्। एनडीए गठबन्धनेन निर्वाचने २९२ आसनानि प्राप्तानि सन्ति। तेषु भाजपा स्वयमेव २४० आसनानि प्राप्तवती। नव दिल्ल्यां प्रधानमन्त्रिणः नरेन्द्रमोदिनः आवासे एनडीए-इति घटकानाम् उपवेशनम् अभवत्। उपवेशने नेताराः तृतीयवारं क्रमशः नरेन्द्रमोदिनः नेतृत्वे नूतनसर्वकारस्य निर्माणार्थं भविष्याधारित कार्यपद्धत्यां चर्चां कृतवन्तः। तेलुगुदेशमदलम् (टीडीपी) प्रमुखः, एनचंद्रबाबूनायडू, जनतादलस्य (युनाइटेड) प्रमुखः एवं बिहारस्य मुख्यमंत्री, नीतीशकुमारः, लोकजनशक्तिदलस्य (रामविलासः) प्रमुखः, चिरागपासवानः अपि च एनडीए घटकस्य अन्ये नेताराः सम्मिलिताः आसन्।

एतादृशे सति एनडीए तृतीयवारं केन्द्रे सर्वकारस्य निर्माणं कर्तुं गच्छति। नूतनसर्वकारस्य शपथग्रहणस्य तिथिः समयः च निर्णीतः अस्ति। मीडिया-सञ्चारमाध्यमानाम् अनुसारं प्रधानमंत्रिणः नरेन्द्रमोदीवर्यस्य शपथग्रहणसमारोहः जूनमासस्य ०८ दिनाङ्के सायंकाले भवितुं शक्नोति। तृतीयवारं शपथग्रहणमात्रेण नरेन्द्रमोदीनाम्ना नूतनः अभिलेखः पञ्जीकृतः भविष्यति। तृतीयवारं शपथग्रहणं कृत्वा मोदी तृतीयवारं विजयं प्राप्य देशस्य द्वितीयः नेता भूत्वा देशस्य प्रधानमन्त्री भविष्यति इति वदामः। पूर्वं पं जवाहरलालनेहरू इत्यस्य नाम्ना एषः अभिलेखः आसीत्, परन्तु अधुना मोदी तस्य अभिलेखस्य समकक्षतां अकरोत्।

## प्रधानमन्त्रिणा राष्ट्रपतिभवने प्रदत्तं त्यागपत्रम्

प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिभवने राष्ट्रपति द्रौपदी मुर्मू इत्यनया सह मिलित्वा केन्द्रीयमन्त्रिपरिषदा सह स्वीयं त्यागपत्रं प्रदत्तवान्। राष्ट्रपतिः त्यागपत्रं स्वीकृत्य प्रधानमन्त्रिणः केन्द्रीयमन्त्रिपरिषदा च नूतनसर्वकारस्य संघटनम् यावत् पदे यथावदेव भवितुम् आहं कृतवती।

# मुख्यमन्त्रिणा नवीनपटनायकेन भुवनेश्वर स्थिते राजभवने राज्यपालाय रघुबरदासाय स्वीयत्यागपत्रं प्रदत्तम्



ओडिशायाः - मुख्यमन्त्रिणा नवीनपटनायकेन भुवनेश्वर स्थिते राजभवने राज्यपालाय रघुबरदासाय स्वीयत्यागपत्रं प्रदत्तम्। राज्ये सद्य एव समाप्ते विधानसभानिर्वाचने स्वपक्षस्य बीजुजनतादलस्य पराजयानन्तरं तस्य त्यागपत्रं आगतम्। ध्येयं वर्तते यत् श्रीपटनायकः ओडिशाराज्यस्य सर्वाधिकदीर्घकालं यावत् मुख्यमन्त्री रूपेण अस्ति यः पञ्चवारमपि कार्यं कृतवान्, यो हि चतुर्विंशतिः वर्षाणि त्रयः मासाः च प्रसूतः। सः प्रथमवारं द्विसहस्रतमे वर्षे मार्चमासस्य पंचमे दिनाङ्के ओडिशा-राज्यस्य मुख्यमन्त्रीरूपेण शपथ ग्रहणं कृतवान् आसीत्। बीजुजनतादलस्य भाजपा-दलेन द्वारा आश्चर्यजनकपराजयः अभवत्। ओडिशा-विधानसभायां भाजपेति दलेन सप्तचत्वारिंशदधिकैक शत् आसनेषु अष्टसप्ततिः आसनानि विजितानि।

## INDIA गठबन्धनसहभागिनः मिलित्वा केन्द्रे सर्वकारस्य निर्माणस्य रणनीतिं निर्धारितवन्तः

केन्द्रे सर्वकारस्य निर्माणस्य रणनीत्याः निर्णयार्थं नूतनदिल्लीनगरे INDIA इति गठबन्धनसहभागिनः मिलितवन्तः। एषा सभा काङ्ग्रेस-अध्यक्षस्य मल्लिकार्जुन-खर्गे इत्यस्य आधिकारिकनिवासस्थाने अभवत् ।समागमे खर्गे महोदयः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदीविरुद्धं जनादेशं गतं। सः अवदत् यत् एषा मोदीमहोदयस्य कृते महती राजनैतिकहानिः नैतिकपराजयः च अस्ति। श्री खर्गे इत्यनेन उक्तं यत् INDIA Alliance संविधानस्य प्रस्तावनायां निहितमूल्यानां प्रति प्रतिबद्धानां सर्वेषां पक्षानाम् स्वागतं करोति।

## विश्वपर्यावरणदिवसे "एक पेड माँ के नाम" इति अभियानस्य आरम्भं कृतवान् प्रधानमंत्री



हिमसंस्कृतवार्ताः - डॉ नरेन्द्रराणा सिरमौरः । प्रधानमन्त्रिणा नरेन्द्रमोदिना विश्वपर्यावरणदिवसस्य अवसरे बुद्धा-जयन्ती-उद्याने वृक्षारोपणं कृत्वा 'एक पेड माँ के नाम' इति अभियानस्य आरम्भं कृतम्। अस्य अभियानस्य उद्देश्यं देशे सर्वत्र कोटि-वृक्षाणां रोपणार्थं अद्वितीयं जन-आन्दोलनं निर्मातुं वर्तते। अस्मिन् अवसरे केन्द्रीय-पर्यावरणमन्त्री भूपेन्द्र यादवः, दिल्ली उपराज्यपालः विनयकुमारसक्सेना च तेन सह उपस्थिताः आसन्।

## इटली-मॉरिशस-भूटान-नेपाल-मालदीव-श्रीलंका-देशाः प्रधानमन्त्रिणं स्वीय-शुभकामनाः प्रख्यापितवन्तः

विश्वस्य अनेकैः नेतृभिः लोकसभा निर्वाचने सततं तृतीयवारमपि विजयस्य प्राप्तेरनन्तरं प्रधानमन्त्रिणे नरेन्द्रमोदिने अपि च भारतीयजनतापार्टीति दलाय वर्धापनानि प्रदत्तानि । इटली-मॉरिशस-भूटान-नेपाल-मालदीव-श्रीलंका-देशाः प्रधानमन्त्रिणं स्वीय-शुभकामनाः प्रख्यापितवन्तः। एकस्मिन् सञ्चारसन्देश पटले श्रीलंकायाः राष्ट्रपतिः रानिलविक्रमसिंघेः शुभकामनाः प्रयच्छन् भारतेन सह सुदृढ-सहभागित्वाय कामनां कृतवान्। भूटानस्य प्रधानमन्त्रिणा शेरिंग-तोबगे इत्येननानि उभयोः देशयोर्मध्ये स्थापित-सम्बन्धान् इतोऽपि सुदृढीकर्तुं निज-आशा प्रकटिता। प्रधानमन्त्री नरेन्द्रमोदी अपि प्रदत्तशुभकामनाभ्यः विश्वनेतॄन् प्रति स्वकृतज्ञतां प्रकटितवान् उक्तवान् च यत् भविष्यकालिके कस्मिन्नपि कार्ये असौ देशैः सह मिलित्वा कार्यं निष्पादयिष्यति।

## नीट इत्यस्य परिणामस्य घोषणा

राष्ट्रिय-परीक्षा-अभिकरणं चिकित्सकीय-स्नातक-प्रवेश-परीक्षायाः नीट-यूजी- इत्याख्यायाः परिणामः उद्घोषितः। अभ्यर्थिनः exams.nta.ac.in/NEET इत्यस्मिन् अन्तर्जालपटले द्रष्टुं शक्यन्ते। इयं परीक्षा मईमासे पञ्चमे दिनांके आयोजिता आसीत्।

## सुभाषितम्

**अनुकूले विधौ देयं**
**यतः पूरयिता हरिः।**
**प्रतिकूले विधौ देयं**
**यतः सर्वं हरिष्यति।।**

भावार्थः- भाग्य अनुकूल हो, तब दान देना चाहिए क्योंकि सब देने वाला भगवान् है। भाग्य प्रतिकूल हो, तब भी दान देना चाहिए क्योंकि सब हरण करने वाला भी भगवान् ही है।

हिमसंस्कृतवार्ताः, अमितशर्मा

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## देवेन्द्र फडणवीसः राज्ये दलस्य असन्तोष प्रदर्शनस्य पूर्णं उत्तरदायित्वं स्वीकृतवान्



भाजपेति दलस्य वरिष्ठनेता महाराष्ट्रस्य उपमुख्यमन्त्री च देवेन्द्र फडणवीसः राज्ये दलस्य असन्तोष प्रदर्शनस्य पूर्णं उत्तरदायित्वं स्वीकृतवान्। सः उपमुख्यमन्त्रीपदात् त्यागपत्रं दातुं प्रस्तावम् अयच्छत्, यदि केन्द्रीयनेतृत्वं अनुमतिं प्रदास्यति तर्हि सः पदात् त्यागपत्रं दास्यति इति च अवदत्। सः अवदत् यत् त्यागपत्रस्य अनन्तरं सः राज्ये आगामि-विधानसभा- निर्वाचनस्य प्रचारार्थं स्वसमयं प्रदास्यति इति।

## 2023-24 तमे वर्षे देशे समस्तसस्योत्पादनस्य 3288 टनपरिमितं यावत् अनुमानम्

त्रयोविंशत्यधिक द्विसहस्र, चतुर्विंशत्यधिक द्विसहस्र तमे वर्षे देशे समस्त सस्योत्पादनं अष्टाशीत्यधिक-द्विशतोत्तर-त्रिसहस्र-लक्ष टन-परिमितं यावत् भवति इति अनुमानम् अस्ति । कृषिमन्त्रालयेन प्रकाशितस्य प्रमुख-कृषि-सस्यानां तृतीयस्य अग्रिमानुमानस्य अनुसारं समस्त- भविष्यतीति तण्डुलोत्पादनं सप्तषष्ट्याधिक-त्रिशतोत्तर-एक-सहस्र-लक्षटन-परिमितं अनुमानम् अस्ति। गोधूमस्य उत्पादनं ऊनविंशत्यधिकैक शतोत्तर एक सहस्र लक्ष टन परिमितात् अधिकं भवति इति अनुमानितम् अस्ति।

# हिमाचलनिर्वाचनम्: मण्डीविजयस्य नायकः अभवत् जयरामठाकुरः, क्षणमपि कङ्गनायाःपक्षं न त्यक्तवान्



**हिमसंस्कृतवार्ता - लघ्वीकाशी मण्डी।**
हिमाचले लोकसभानिर्वाचनं सम्पन्नम्। यस्मिन् लोकसभानिर्वाचनस्य मण्डीसंसदीयक्षेत्रस्य निर्वाचनम् बहु ऊष्णमासीत्। राजनैतिकयुद्धम् अभवत् अस्मिन् युद्धे एकतः मायानगर्याः राज्ञी अपरतः राजनीते राजा आसीत्, परन्तु मायानगर्याः राज्ञी राजनीते राजानं पराजयितुं सफला अभवत्। कारणं तत् कवचम् आसीत् यत् राज्ञाः विजये महत्त्वपूर्णां भूमिकां निर्वहति स्म, निर्वाचनक्षेत्रे च प्रचुरं परिश्रमं कृतवान। सर्वैः सर्वाणि पात्राणि सम्यक् अवगतानि स्युः। आम्, राजनैतिकयुद्धे काङ्ग्रेस-प्रत्याशी विक्रमादित्यसिंहस्य पराजयस्य, भारतीयजनतापक्षस्य प्रत्याशिनः च अभिनेत्री-कङ्गना रानौतायाः च विजयस्य मुख्यश्रेयः पूर्वमुख्यमन्त्रिणे विपक्षनेत्रे जयरामठाकुराय च गच्छति।
राजनैतिकं युद्धं कङ्गनायाः कृते सर्वथा नूतनः अनुभवः आसीत्, परन्तु जयरामसदृशस्य अनुभविनां समर्थनं यदा प्राप्तवती तदा विजयस्य पुष्टिः अभवत्। मण्डीसंसदीयासने जयरामठाकुरेण कृतस्य परिश्रमस्य परिणामः सर्वेषां समक्षं वर्तते। सः सर्वेषु १७ विधानसभाक्षेत्रेषु यथासम्भवं ग्रामान् प्राप्य तत्रत्यानां जनानां साक्षात्कारं कृत्वा स्वविचारं प्रस्तुत्य सफलः अभवत्।
जयरामठाकुरः प्रत्येकं मञ्चे मण्डीक्षेत्रस्य सम्मान, मानस्य, आत्मसम्मानस्य च विषयः प्रमुखतया स्थापितः। जयरामठाकुरस्य विषये अन्यैः नेतृभिः अनेकानि वचनानि उक्तानि परन्तु सः स्वयमेव शालीनतां प्रदर्शयति स्म, सभ्यतायाः परिधिमध्ये च वदति स्म । एतदेव कारणम् आसीत् यत् मण्डी-जनाः स्वस्य प्रियस्य नेतुः वचनस्य आदरं कृत्वा स्वस्य आज्ञापत्रं प्रदत्तवन्तः।

# वृष्टिः- शिमलासहितेषु हिमाचलस्य अनेकेषु जनपदेषु मेघवर्षणम्, अश्मपाताः च अभवन्



**हिमसंस्कृतवार्ता - शिमला।**
हिमाचलप्रदेशस्य अनेकेषु भागेषु ऋतौ परिवर्तनं जातम्। बुधवासरे अपराह्ने कुल्लुनगरे प्रचण्डवृष्टिः अभवत्। अत्यधिकवृष्ट्या तापमानस्य न्यूनता ज्ञाता। वर्षाकारणात् जनाः उष्णतायाः किञ्चित् विश्रान्तिं प्राप्तवन्तः। तत्सह शिमलामण्डलस्य अपि अनेकेषु भागेषु वर्षा अभवत्। चौपालस्य थरोचक्षेत्रे अश्मपातेन सह वर्षा अभवत्। ऋतुपरिवर्तिता, बुधवासरे सायं ५:२० वादनस्य अनन्तरं राजधानी शिमलानगरे वर्षा आरब्धा। मण्डलमुख्यालयस्य चम्बानगरे अपराह्ने २:०० वादने लघुवृष्ट्या जनैः तप्ततापात् संबलं प्राप्तम्। काङ्गरामण्डलस्य अनेकेषु भागेषु वातचक्रस्य अनन्तरं वर्षा, लघु- ओलावृष्टिः च अभवत्। सायंकाले सोलनमण्डले अपि वर्षा अभवत्। ऋतुविज्ञानकेन्द्रशिमलायाः अनुसारम् बुधवासरे राज्यस्य अनेकेषु भागेषु वर्षा भविष्यति इत्यानुमानमासीत्। गतदिवसाद् त्रिदिवसं यावत् केषुचित् भागेषु अश्मपातस्य पीत-सचेतना अपि निर्गता अस्ति। राज्यस्य अनेकेषु भागेषु जूनमासस्य ८ दिनाङ्कपर्यन्तं वर्षा भवितुं शक्नोति। ९ जूनतः सम्पूर्णे राज्ये ऋतुः स्वच्छा एव भवितुं शक्यते।

## कुत्र कियत्

### अधिकतमं तापमानम्

| | |
|---|---|
| ऊना - | ४२.० |
| नेरी - | ४३.६ |
| बिलासपुरम्- | ४२.० |
| सुन्दरनगरम्- | ३७.९ |
| काङ्गड़ा- | ३९.० |
| मण्डी - | ३८.७ |
| चम्बा - | ३६.९ |
| धौलाकुआं - | ३९.२ |
| बरठीं - | ३९.० |
| बजौरा- | ३७.४ |
| डलहौजी - | २८.३ |
| रिकाङ्गपिओ - | २८.५ |
| नाहनम् - | ३५.८ |
| सोलनम् - | ३३.० |
| शिमला - | २८.८ |

# २९५ कोटिरूप्यकाणां व्ययेन निर्मिता भविष्यति नवबहारतः शिमलानगरस्य आईजीएमसीपर्यन्तं ८९० मीटरदीर्घा कन्दरा



हिमसंस्कृतवार्ता - शिमला। हिमाचलप्रदेशस्य राजधानी शिमलानगरे सम्मर्दस्य निवारणाय राज्यसर्वकारः जाखुपर्वतस्य अधः नवबहारतः वृत्तीयमार्गे (सर्कुलर-रोड़) इन्दिरागान्धी- चिकित्सा-महाविद्यालयपर्यन्तं ८९० मीटरदीर्घा द्विपङ्क्तिकन्दरा निर्मास्यते। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः बुधवासरे लोकनिर्माणविभागस्य अधिकारिभिः सह गोष्ठ्याः अध्यक्षतां कुर्वन् एतां सूचनां दत्तवान्। २९५ कोटिरूप्यकाणां व्ययेन कन्दरायाः निर्माणं भविष्यति, यस्मात् १०० कोटिरूप्यकाणि पूर्वमेव मुक्तानि सन्ति, अस्य मासस्य अन्ते यावत् निविदाप्रक्रिया आरभ्यते इति मुख्यमन्त्री अवदत्। शिमलानगरे विविधसमस्यानां समाधानार्थं राज्यसर्वकारः गम्भीरप्रयत्नाः कुर्वन् अस्ति, येन स्थानीयजनाः अपि च अत्र आगच्छन्तः पर्यटकाः उत्तमसुविधाः प्राप्तुं शक्नुवन्ति। वाहनानां सुचारुगत्यर्थं वृत्तमार्गे सर्वाणि विघ्नानि दूरीकर्तुं विभागाय निर्देशं दत्तवान्। अस्य अन्तर्गतम् एकसप्ताहस्य अन्तः भू-अधिग्रहण-प्रक्रिया आरभ्यते। वृत्तमार्गस्य विस्तारार्थं १२२ कोटिरूप्यकाणि विनियोजितानि सन्ति। एतदतिरिक्तं ३००० वाहनानां कृते यानस्थगनस्थलस्य (पार्किङ्ग) सुविधा निर्मीयते। मुख्यमंत्रिणा उक्तं यत् राज्यसर्वकारः शिमलानगरे उपरितनतारं दूरीकर्तुं योजनायां कार्यं कुर्वन् अस्ति। विद्युत्केबलानां, प्रकाशतन्तुनां च कृते भूमिगतनलिकाः विन्यस्ता भविष्यन्ति। अस्याः परियोजनायाः प्रारम्भिकपदे मॉलरोड्, लोअरबाजार, मिडिल मार्केट् क्षेत्रेषु ध्यानं दत्तम् अस्ति। एतदर्थं २३ कोटिरूप्यकाणां व्ययः भविष्यति।

# हमीरपुरतः चण्डीगढं यावत् द्वौ नूतनौ बसमार्गौ आरब्धौ



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** किरतपुरनेरचौकस्य चतुष्पंक्तिराजमार्गस्य निर्माणानन्तरं यात्रा विश्रान्तिदायिनी अभवत्। अन्तरम् अपि न्यूनीकृतम् अस्ति। अस्मिन् मार्गे यात्रीवाहनानां अभावं पूरयितुं हिमाचलपथपरिवहननिगमस्य (एचआरटीसी) बिलासपुर-आगारेन हमीरपुरतः चण्डीगढं यावत् बसमार्गद्वयं प्रारब्धम् अस्ति।
प्रथमः बसमार्गः हमीरपुरतः चण्डीगढं प्रति प्रातः ६.३० वादने प्रस्थास्यति, प्रातः १० वादने चण्डीगढं प्राप्स्यति। सायंकाले चण्डीगढतः हमीरपुरं प्रति सायं ५.१० वादने एव बसयानं प्रस्थास्यति। तदनन्तरं द्वितीयमार्गे सायं ५.१० वादने हमीरपुरतः चण्डीगढं प्रति प्रस्थास्यति, सायं ९ वादने चण्डीगढं प्राप्स्यति।
इदं बसयानं परदिने प्रातः १०.२० वादने चण्डीगढतः प्रस्थाय अपराह्ने २.२० वादने हमीरपुरं प्राप्स्यति। हिमाचलपथपरिवहननिगमस्य क्षेत्रीयप्रबन्धकः विवेकलखनपालः अवदत् यत् यात्रिकाणां सुविधायै एतौ नूतनौ मार्गौ आरब्धौ, येन जनानां कस्यापि समस्यायाः सम्मुखीकरणं कर्तव्यं न भवेत्।

# बिलासपुरस्य प्राचीनतमसेतोः भविष्यति पुनर्निर्माणम्, आचारसंहितायाम् आरोपणात् कार्यं निरुद्धमासीत्

**अयं सेतुः राजा अमीचन्देन १८८९ तमे वर्षे निर्मितम्। सेतुनिर्माणानन्तरं सदर, घुमारवीं झण्डुता विधानसभाक्षेत्रस्य ३५ पंचायतानां लाभः भविष्यति**

हिमसंस्कृतवार्ता- बिलासपुरम्। शासनपरिवर्तनानन्तरं स्थगितस्य भजवानीसेतुनिर्माणप्रक्रिया आदर्शाचारसंहितायाः निष्कासनानन्तरं आरभ्यते इति संभावना वर्तते। अस्य सेतोः द्वयोः अन्तयोः निर्माणस्य मार्गस्य भूमिं प्राप्तुं मुख्य-अभियंताकार्यालयात् २ कोटि ६० लक्षं ६० सहस्ररूप्यकाणां राशिः अनुमोदिता।
यत्र अस्य सेतोः निर्माणार्थं केन्द्रसर्वकारेण २०२२ तमस्य वर्षस्य अगस्तमासस्य १० दिनाङ्के केन्द्रीय आधारभूतसंरचनाकोषात् १०३ कोटि ३१ लक्षरूप्यकाणां राशिः अनुमोदिता आसीत्, तस्य अनुमोदनं लोकनिर्माणविभागस्य प्रधानसचिवेन ३० अगस्त २०२२ दिनाङ्के दत्तम्। तदनन्तरं राज्ये विधानसभानिर्वाचनस्य आचारसंहिता प्रवर्तिता, राज्ये शासनपरिवर्तनानन्तरं प्रकरणं स्थगितम्।

# संस्कृतेन संस्कृतप्रशिक्षणवर्गस्य उद्घाटनम्



**हिमसंस्कृतवार्ताः, अभिनव कुमार मिश्रा दरभङ्गा।** संस्कृतविश्वविद्यालये १२-दिवसीय आवासीय संस्कृत प्रशिक्षणवर्गस्य उद्घाटनं शनिवासरे ०६ जून तिथौ विधिवत् भविष्यति। अस्मिन् अवसरः मुख्यालयस्य दरबार हॉल इति स्थले पूर्वाह्ने १०.३० वादने कार्यक्रमः आयोजयिष्यते। संस्कृतभारती बिहार न्यास- कामेश्वरसिंह दरभङ्गा संस्कृतविश्वविद्यालयस्य संयुक्ततत्वावधाने अस्मिन् प्रशिक्षणवर्गे बिहार-झारखण्डराज्याभ्याम् आगताः १२५ प्रशिक्षार्थिनः सहभागं करिष्यन्ति। प्रशिक्षणं १७ जून पर्यन्तं प्रचालिष्यते। वर्गाणां संचालनं मुख्यालयस्य नवपरिक्षाभवने भविष्यति। अस्य कार्यक्रमस्य सफलतायै २८ अप्रैल तिथौ मुख्यालये संकल्पयज्ञः अपि आयोजयितः आसीत्। एवम्, संरक्षकद्वयः डीएसडब्ल्यू डॉ. शिवलोचन झा, सीसीडीसी डॉ. दिनेश झा इत्येतयोः निगराण्याम् आयोज्यमानम् अस्य कार्यक्रमस्य व्यवस्था च निरीक्ष्य स्वयं कुलपतिः प्रो. पाण्डेय महोदयः परीक्षाभवनं गत्वा आवश्यकानि निर्देशान् अददात्। तस्मिन्समये भूसम्पदाधिकारी डॉ उमेश झा, शिक्षाशास्त्रनिदेशकः डॉ. घनश्याम मिश्रः, डॉ रामसेवक झा, डॉ त्रिलोक झा चापि सन्निहिताः आसन्।
प्रवक्त्रा निशिकान्तेन उक्तं यत् कार्यक्रमे संयोजक सह संस्कृतभारती प्रान्तप्रचारप्रमुखः डॉ रामसेवक झा तथा निवेदकानां मध्ये संस्कृतभारती प्रान्तमन्त्री डॉ रमेश कुमार झा, संगठनमन्त्री श्रवण कुमार, स्थानीयविभागसंयोजकः डॉ त्रिलोक झा इत्येतैः वर्गसंचालनार्थं सुदृढव्यवस्था कृता।

## कार्यक्रमस्य शोभा वर्धयिष्यन्ति पूर्वकुलपतिद्वयम्

आवासीय प्रशिक्षणवर्गस्य उद्घाटनसमारोहे संस्कृतविश्वविद्यालयस्य द्वौ पूर्वकुलपतिः उपस्थितौ भविष्यतः। प्रो. शशिनाथ झा विशिष्टातिथिरूपेण प्रो. रामचन्द्र झा सम्मानितातिथिरूपेण आमन्त्रितौ भविष्यतः। उद्घाटनसत्रस्य मुख्यातिथिः कुलपतिः प्रो लक्ष्मीनिवासपाण्डेय भविष्यति। अध्यक्षता संस्कृतभारती बिहारस्य प्रान्ताध्यक्षः प्रोफेसरः इन्द्रनाथ झा करिष्यति। संस्कृतभारती, बिहार- झारखण्डस्य क्षेत्रमन्त्री प्रो. प्रकाशपाण्डेय सारस्वतातिथिः भविष्यति।

## संस्कृतस्य प्रसाराय प्रशिक्षणवर्गः आयोज्यतेः कुलपति

कुलपतिः प्रो. पाण्डेय महोदयः उक्तवन्तः यत् संस्कृतस्य प्रचारः प्रसारः च आवश्यकौ स्तः। संस्कृतं अस्ति चेत् संस्कृति अस्ति। इति व्यवहारभाषारूपेण कर्तुं प्रयासाः निरन्तरं कुर्वन्तु इति आह्वानं कृतवन्तः। तेन उक्तं यत् संस्कृतस्य प्रसारे अयं प्रशिक्षणवर्गः अतीव साहाय्यकरः भविष्यति। अत्र संवादकौशलं शिक्षित्वा, एते प्रशिक्षार्थिनः समाजे संस्कृतस्य नवीनं ज्योतिं प्रज्वालयिष्यन्ति। अल्पम् अल्पम् एव, परन्तु अस्य दिशि सर्वेषां प्रयासः आवश्यकः अस्ति।

## विना सेवाभावेन राष्ट्रीयसेवायोजना सफला न भविष्यति - कुलपतिः प्रो. लक्ष्मीनिवासपाण्डेयः

संस्कृतविश्वविद्यालयस्य बहुउद्देशीयभवने शिक्षाशास्त्रविभागस्य एनएसएस प्रभागेन योगः स्वास्थ्यं स्वच्छता च इति विषयेषु आयोजिता विशेषशिविरस्य समापनकार्यक्रमे कुलपतिः प्रो. लक्ष्मीनिवासपाण्डेय महोदयः सम्बोधितवन्तः। ते अवदन् यत् विना सेवाभावेन एषा योजना सफलः न भविष्यति। अतः मनसः सामाजिकता सह राष्ट्रीयतां अपि निर्वर्तयितव्या। ते अधिकाधिकं संस्कृतसंभाषणकार्यक्रमं कर्तुम् अवदत्। प्रवक्त्रा निशिकान्तेन उक्तं यत् द्विवर्षीय बीएड कार्यक्रमस्य सफलतायाः शुभकामनाः दत्त्वा ते स्वयंसेवकेभ्यः प्रमाणपत्राणि अपि वितरितवन्तः। भूसम्पदाधिकारी डॉ. उमेशझा महोदयः अवदत् यत् "बालकान् आत्मनः अपि श्रेष्ठान् कर्तुम् एव उत्तमस्य गुरोः सफलता भवति। गुरुः सदा छात्राणां प्रति वात्सल्यभावं धारयितुं अर्हति।" एनएसएस पदाधिकारी डॉ. सुधीरकुमारझा महोदयः अवदत् यत् सेवा वक्तुं वा श्रोतुं वा अति सरलम् अस्ति, परन्तु तस्य आचरणं कठिनम्। तथापि, स्वयंसेवकेभ्यः उत्तमतायाः अपेक्षा क्रियते, यस्मिन् सर्वे सम्यक् उत्तिष्ठन्ति।
प्रो. पुरेन्द्रवारिकः योगः स्वच्छता स्वास्थ्यं च इति विषये प्रकाशं अददात्। धन्यवादज्ञापनं डॉ. प्रीतिरानी महाभागया कृतम्। शिविरस्य उद्घाटनं ३० मे तिथौ अभवत्। अवसरः सर्वे वक्तारः स्वयंसेवके प्रोत्साहितवन्तः। कार्यक्रमे शिक्षाशास्त्रविभागस्य एनएसएस समन्वयकः पवनसहनी सहित अन्यशिक्षकाः कर्मिणः च संजीवकुमारः अमनरायः गोपालकुमारमहतोः अनामिकाकुमारी श्रीधरकुमारः राकेशकुमारः अरुणकुमारशर्मा च उपस्थिताः आसन्। अवसरः स्नातकोत्तरविभागानाम् अपि अधिकांशः शिक्षकाः उपस्थिताः आसन्

# धारावाहिकं

## गीताप्रश्नोत्तरम् -५९

धृतराष्ट्रः- हे सञ्जय! ततः परम् अर्जुनः श्रीकृष्णस्य तस्मिन् दिव्यस्वरूपे अन्यत् किं किं दृष्टवान्? विस्तरेण वद।

सञ्जयः - आं, राजन् ! अर्जुनः आश्चर्यचकितः सन् एवं कथयन् अस्ति, तच्छ्रूयताम् ।

अर्जुनः - हे विश्वरूप ! विश्वस्य परमेश ! अहं त्वाम् अनेकबाहूदरमुखनेत्रस्वरूपं तथैव सर्वतः अनन्तस्वरूपयुक्तं पश्यामि । भवतः अस्य महतः स्वरूपस्य आदिं, मध्यम्, अन्तं च न किमपि पश्यामि । तव शिरसि मुकुटं राजते, हस्तेषु गदां, चक्रं, शङ्खं, पद्मं च धारयन्तं त्वाम् अवलोकयामि । अहो, सर्वतः प्रकाशमानः तेजसमूहः दृश्यते । त्वाम् अग्निसूर्यवत् देदीप्यमानं कान्तिमन्तं, नेत्राभ्यां दुर्निरीक्ष्यं, सर्वतः अप्रमेयस्वरूपम्, अद्भुतं च पश्यामि । हे प्रभो ! त्वमेव ज्ञातुं योग्यः, परमम् अक्षरं ब्रह्म, विश्वस्य परमाधारः, सनातनधर्मस्य संरक्षकः, सनातनः पुरुषः चासि इत्यहं मन्ये ।

श्रीकृष्णः - हे अर्जुन ! त्वं मत्स्वरूपं सम्यक् पश्यन् असि, उत केवलं मन्यमानः एव ?

अर्जुनः - भगवन् ! अहन्तु आदिमध्यान्तरहितम्, अनन्तप्रभावशालिनम्, अनन्तबाहुं, शशिसूर्यनेत्रं, प्रज्वलितम् अग्निसमम्, अनेकमुखवन्तं, स्वतेजसा समस्तविश्वं तपन्तं च त्वां पश्यन् अस्मि ।



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

हे परमप्रभो ! हे महात्मन् ! स्वर्गपृथिव्योः मध्ये, दश दिशः, सर्वत्र, सर्वप्रकारेण च त्वया एव परिव्याप्तमस्ति । तव इदम् अद्भूतम् उग्रं स्वरूपं च अवलोक्य त्रयः लोकाः व्यथिताः सन्ति । अहो ! ते देवसमुदायाः अपि त्वयि एव प्रविष्टाः दृश्यन्ते । तेष्वपि केचन तु भयभीताः सन्तः, कृताञ्जलयः ते तव गुणगानं, नामकीर्तनं च कुर्वन्तः सन्ति । एवमेव महर्षयः, सिद्धसमुदायाः च 'कल्याणमस्तु, मङ्गलमस्तु' इत्युक्त्वा अतीव शोभनैः स्तोत्रैः त्वां स्तुवन्तः सन्तीति प्रत्यक्षं ते त्वयि दृश्यन्ते ।

ये रुद्राः, आदित्याः, वसवः, साध्यगणाः, विश्वेदेवाः, अश्विनीकुमारौ, मरुद्गणाः, पितरः, गन्धर्वाः, यक्षांसि, असुराः, सिद्धसमुदायाः च सन्ति, ते सर्वेऽपि आश्चर्यान्विताः सन्तः त्वां पश्यन्ति । अहो ! एतदतीव अद्भुतं स्वरूपं तव भगवन् ! इति । (११/१६-२२)

(अनुवर्तिष्यते) -नारदोपाध्यायः।

# संवैधानिकमूल्यानां निरन्तरताम्प्रतिबिम्बयन्ति न्यायाधीशाः - सीजेआइ चन्द्रचूडः



**हिमसंस्कृतवार्ताः।** भारतस्य मुख्यन्यायाधीशः डी.वाई.चन्द्रचूडः अवदत् यत् यद्यपि निर्वाचनं भारतस्य संवैधानिकप्रजातन्त्रस्य आधारः अस्ति तथापि न्यायाधीशाः व्यवस्थायाः रक्षणं कुर्वन्ति संवैधानिकमूल्यानां पालनस्य भावनां प्रतिबिम्बयन्ति। समाजे न्यायाधीशानां मानवीयभूमिकायाः विषये प्रतिष्ठिते आक्सफोर्डविश्वविद्यालये सी.जी.आइ.चन्द्रचूडः वदति स्म। अस्मिन् काले सः न्यायव्यवस्थायां अधिकां पारदर्शिताम् आनेतुं प्रौद्योगिक्याः भूमिकां प्रकाशितवान् । सामाजिकमाध्यमेषु न्यायाधीशानां विरुद्धं कृतानि काश्चन अन्यायपूर्णानि आलोचनानि प्रकाशयन् भारतस्य मुख्यन्यायाधीशः बोधयति यत् प्रौद्योगिक्याः समग्रः प्रभावः न्यायपालिकायाः समाजस्य व्यापकवर्गपर्यन्तं गन्तुं साहाय्यं कर्तुं वर्तते। सीजेआइ चन्द्रचूडः स्पष्टं कृतवान् यत् सः कदापि राजनैतिकदबावस्य समक्षतां न कृतवान्।
भारते सामान्यनिर्वाचनविषये पृष्टस्य प्रश्नस्य उत्तरे सः अवदत् यत् निर्वाचनं संवैधानिकप्रजातन्त्रस्य मूलभूतः आधारः अस्ति। भारते न्यायाधीशाः निर्वाचिताः न भवन्ति तथा च अस्य एकं कारणं यत् न्यायाधीशानां मनसि निर्वाचनस्य भावः नास्ति । सी.जे.आइ.चन्द्रचूडः अवदत् यत् लोकतन्त्रे न्यायपालिकायाः महत्त्वपूर्णा भूमिका अस्ति, यस्मिन् वयं परम्परायाः भावनां प्रदर्शयामः तथा च सत्समाजस्य भविष्यं किं भवेत् इति भावनां प्रदर्शयामः। निर्णयं प्रदातुं तस्य राजनैतिकसामाजिकदबावस्य विषये पृष्टः सः अवदत् यत् न्यायाधीशत्वेन मम २४ वर्षेषु अहं कदापि राजनैतिकदबावस्य समक्षतां न कृतवान् इति। सः अवदत् यत् अस्माकं जीवनं शासनस्य राजनैतिकशाखया सर्वथा पृथक् अस्ति, परन्तु स्पष्टतया न्यायाधीशाः व्यापकराजनीत्यां स्वनिर्णयानां प्रभावस्य विषये अवगताः भवेयुः।
एषः राजनैतिकदाबः न, अपितु न्यायालयेन निर्णयस्य सम्भाव्यप्रभावस्य अवगमनम् अस्ति । तत्र उपस्थिताः छात्राः सी.जे.आइ.चन्द्रचूड् इत्यस्मै गतवर्षे सर्वोच्चन्यायालयेन विशेषविवाहकानूनविषये निर्णयस्य विषये प्रश्नं पृष्टवन्तः, यस्मिन् भारते समलैङ्गिकविवाहस्य वैधानिकीकरणस्य विरुद्धं निर्णयः दत्तः आसीत्। सः अवदत् यत् अहम् अत्र न्यायस्य रक्षणं न करिष्यामि, यतः न्यायाधीशत्वेन अहं मन्ये यत् एकदा न्यायस्य उच्चारणं जातं चेत् न केवलं राष्ट्रस्य अपितु वैश्विकमानवतायाः राजधानी भवति।